International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 304-306
© 2017
www.anantaajournal.com
Received: 21-05-2017
Accepted: 25-06-2017

**डॉ. दीनानाथ साह**
सहायक प्राध्यापक, संस्कृत विभाग, पूर्णिमा रामप्रताप संस्कृत महाविद्यालय, बैगनी, दरभंगा, बिहार, भारत

**Correspondence Author:**
**डॉ० दीनानाथ साह**
सहायक प्राध्यापक, संस्कृत विभाग, पूर्णिमा रामप्रताप संस्कृत महाविद्यालय, बैगनी, दरभंगा, बिहार, भारत

# जीविकोपार्जने संस्कृतभाषायाः महत्त्वम्

**डॉ. दीनानाथ साह**

**प्रस्तावना**

संस्कृतभाषा भारतीयानामनुपमक्षयं पैत्रिकं धनम्। यावदेतद् धंन भारतमधिकरोति न जगति कोऽपि देशस्तावद् देशमिमं ज्ञानेऽधरीकर्तुं प्रभविष्णुः। एतस्यां भाषायां तज्ज्ञानं विभ्राजते यत्सदृशं न पूतम्। तल्लब्ध्वा परा शान्तिरासाद्यते तद्वारेण सर्वेऽपि संशया उच्छिन्नतां हृदय–ग्रन्थश्च भिन्नतां ब्रजन्ति। तत् सर्वाण्यपि कर्माणि दग्धुं क्षमते तच्चानन्तमभ्युदयविधायकं सातमहर्निशमजस्रं वर्षति। जगत् तदीयमेव विधं ज्ञानं वेदोपनिषद– दर्शनगीता–रामायण– श्रीमद्भागवतादिभ्यो ग्रन्थ– निर्झरेभ्योऽनायासेनैव पातुं प्रभवति। संस्कृतभाषायां यथाध्यात्मिकं ज्ञानं विपुलं तथैवाधिभौतिकमपि ज्ञानं प्रचुरम्। लोकेऽर्थमन्तरेण जीवनं व्यर्थम्। दुःखानां शकटमेव तन्मतम्। तस्यार्थस्य केन प्रकारेण समुपार्जनं कार्यं केन विधिना स रक्षणीयो वर्धनीयश्चेत्येतद् विषयाणां प्रतिपादनकारिणो ग्रन्था अपि समुपलब्धाः (न दुर्लभाः)। लोकद्वयष्ट्यार्थस्य प्रयोजनमस्ति कामानामुपभोगः। भाषायामस्यां तमपि काम विषयमधिकृत्य ग्रन्था वर्तन्ते। अर्थकामौ धर्मेण निर्दोषौ भूत्वा द्रढीयसीं स्थिति लभेते। भाषायामस्यां धर्मविषयका ग्रंथाः सन्ति पुस्कलाः। तस्मात् भाषेयमैहलौकिकपारलौकिककल्याण– सम्पादयित्रीत्यत्र न कापि संशीतिः।

संस्कृतभाषानेक वैशिष्ट्यशालिनी। तत्र सा संस्कृतिमंदाकिनी प्रवहति यया मानवता जीवनमश्नुवाना सततमुपचयमधिगच्छति। संस्कृतभाषायां यस्य निरूपणं कृतमस्ति सः प्राणिमात्रस्य सुहृत्। सः –

"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।"[1]

संस्कृतभाषायाः साहित्यं गुरुतमम्। न कस्या अपि भाषायाः साहित्यमद्यापि तज्जेतुं पारयति। कामं प्रकामं कस्या अपि अन्यस्या भाषायाः ग्रन्थाः संख्यायां वा शब्दावलिर्गणनायां विशालतरा स्यात्। अस्याः भाषायाः सन्निधौं विद्यमाना ग्रंथाः स्वसारशालितया इतरभाषाणां ग्रन्थान् सलीलं पराभवन्ति। एतदीयायां शब्दावल्यामपि यद् व्यापकत्वं यद् गम्भीरत्वं यद् भिन्नार्थकत्वं यत्प्रकृष्टत्वं, यन्निशित्वं यन्माधुर्य, यत् प्रसादत्वं यदोजस्त्वं यत्सूक्ष्मत्वं यच्च कामधुक्त्वं विद्योते न तत् तत् कस्या अपि भाषायाः शब्दश्रेणीषु सन्निहितमस्ति।

संस्कृतं भाषास्वादिभाषा। सा सर्वासामपि भाषाण्तं जननी। अस्तीयं भाषा रम्या, सरला सरसा च इति। सुरवाणी, देववाणी, सुरभारती, देवभाषा प्रभृतिभिः नाम्ना लोके विख्यातेयं भाषा। याः का अपि भाषा अद्य जगति प्रचलिताः सन्ति किं वा याश्चापि अतीतकाले काश्चन कालकलां यावज्जीवनमवाप्य विलुप्ता अभवंस्तासां निखिलानामपि भाषाणां श्रोतं इयमेवामरभाषास्ति। भाषाया एतस्याः सर्वभाषाजननीत्वोपपादनाय नानिवार्यत्वेनापेक्षितम्। यं हि ऋग्वेदं संसारस्याद्यं पुस्तकं सर्वे अपि प्राच्याः प्रतीच्याश्च पण्डिता एकस्वरेण स्वीकुर्वन्ति। सः स्वर्गापवर्गमार्गप्रदर्शी ज्ञानज्योतिः पुञ्जपावनप्रदीपो वेदः संस्कृतभाषायामेव संशोभते।

"वेदमेव सदाभ्यस्येत् तपस्तप्यन् द्विजोत्तमः।
वेदाभ्यासों हि विप्रस्य तपः परमिहोच्यते।।[2]

वेदाः न केवलं कर्मकाण्डस्य उपासनायाः पूजायाः वा ग्रन्था इति मन्यते अपितु वेदेषु सर्वेषां मानवानां यद् यत् कल्याणकरं तत् तत् सर्वं निहितं वर्त्तते। इदमेव कारणं यद् युगाद् युगान्तराणि व्यतीतानि कालेन कवलीकृताः नैकाः संस्कृतयः सभ्यताश्च, परं वैदिकीः अद्यापि जीवति, न केवलं जीवति अन्यान् अपि जीवयति। वेदेषु कस्यापि एकस्य देशस्य धर्मस्य कालस्य वा वर्णनं नास्ति। तत्र न केवलं ब्राह्मणानाम् अधिकारः नापि च भारतीयानामेव ते तु समेषां विश्वस्थानानां मानवानां कृते वर्तन्ते।

प्राचीनतमें काले वैदिकज्ञानस्य महत्त्वमासीत् अद्यापि भवष्यतिकालेऽपि तन्महत्त्वं तथैव स्थास्यति। वैदिकाः ऋषयः निगदन्ति अस्माभिः कदापि विपथगामिभिः नैव भाव्यम्। यथा –

''मा प्रागाम पथो वयं यज्ञादिन्द्र सोमिनः। मान्तः स्थुर्नो अरातयः।।''[3]

मानवजीवनस्योद्देश्यं केवलम् आहारनिद्राभयमैथुनमेव नास्ति। चरमांद्देश्यमस्ति–प्रभुप्राप्तिः आनन्दावाप्तिः। यथा –

''इयं ते यज्ञिया तनूः।''[4]

अथर्ववेदस्य सुविख्याते भूमिसूक्ते ऋषिः निगदति–

''माता भूमिः पुत्रोऽहं पृथिव्याः।''[5]

अपि च–

''भूमे मातर्निधेहि या भद्रया सुप्रतिष्ठितम्।
संविदाना दिवा कवें श्रियां मा धेहि भूत्याम्।।''[6]

यस्य धनस्य प्राप्त्यर्थमस्माभिः पापकर्माणि क्रियन्ते तन्न कस्यापि जनस्य तत्तु विनाशशीलम्। कल्याणमीप्सुभिः जनैः प्रार्थना क्रियते–

''आ नो भद्राः क्रतवो यन्तु विश्वतः।''[7]

सर्वाभ्यः दिग्भ्यः कल्याणकराः विचारा आयान्तु। यथा–

''विश्वानि देव सवितर्दुरितानि परासुव। यद् भद्रं तन्न आसुव।।[8]

लौकिक साहित्ये वाल्मीकिप्रणीतं रामायणं, महर्षिवेदव्यासप्रणीतं महाभारतम्, अष्टादशपुराणानि, गद्यसाहित्यं काव्यसाहित्यं, कथासाहित्यं नाटकानि च अनयैव संस्कृतभाषया लिखितानि सन्ति। लौकिक साहित्यमेव आयुर्वेद–ज्योतिष–व्याकरण–काव्य–दर्शन–कोष–धर्म–अर्थ–कामसंबद्धानि अनेकानि साहित्यानि स्वरूपतामायातानि। तदित्थं श्रीमन्नृ– पविक्रमार्कात् षट्सहस्रमितवत्सरपूर्वकालादारभ्य अद्ययावदनवरतरूपेण प्रणीयमानं व्याख्याय मानमभ्यस्यमानञ्च संस्कृतसाहित्यं यदि कृत्रिमत्वेन गृहयते तदा तु जगदवस्थितिरेव कृत्रिमा सम्पद्येत। ईदृशं विस्तृतं परिपूर्णञ्च साहित्यं नान्यस्यां भाषायां कुत्रापि दृश्यते। अत एव सगौरवमित्थमुदघोषितमस्ति'' यन्नेहास्ति न तत्क्वचित्'' इति।
संस्कृतभाषा वस्तुतः गणितमिव एका विशुद्धा सम्पूर्णा समुचिता तथ्यपूर्णा च भाषाऽस्ति। तथापि एषा गणितमिव तार्किकगणितीयविवेचनात्मिका एव नास्ति अपितु सङ्गीतमिव मानवीयभावैः अन्तः संवेदनाभिः सुनिबद्धास्ति। मनमस्तिष्कस्य उत्थानस्य अद्भुतशक्तिसम्पन्ना तथा च ज्योतिषं शुल्वसूत्रदिविशिष्टगणितीय विवेचनाभिः सम्पृक्तं संस्कृतम् आदर्शभाषानिष्ठज्ञानं वर्तते। तार्किकदृष्ट्या विशुद्धविज्ञानं वर्तते।
भावनात्मकदृष्ट्या एषा भाषा विशुद्धसाहित्यस्य संवेदनायाः वा उद्गमस्थलं वर्त्तते। स्पष्टाभिव्यक्तिं समुन्नतहार्दिक प्रेरणां च समुत्पन्नकर्त्री संस्कृतभाषा रचनात्मकाभिव्यकतेः अद्वितीया प्रतिभासम्पन्नाऽस्ति। एषा सम्पन्नता सहस्रवर्षपर्यन्तं प्राचीनऋषीणां वैज्ञानिक प्रतिभायाः साधनायाः वा प्रतिफलं वर्तते।
श्रीमतिकारलोटमैनिंग महोदयायाः मन्तव्यं वर्तते यत्– ''पाणिनीय–व्याकरणं सर्वाधिकं प्राचीनं प्रतिष्ठितञ्च वर्तते। व्याकरणमिदं कस्याचिदपि भाषायाः भाषाविज्ञानस्य अध्ययनाय भाव्यध्येतृणामध्ययनाय च अमूल्यनिधि वर्तते। प्रो मैक्समूलर महोदयोऽपि कथयति यत् पाणिनीव्याकरणस्य वैज्ञानिकता विश्वेडस्मिन्। अन्यत्र कस्यामपि भाषायां न दृश्यते। भारतस्य लब्धप्रतिष्ठः भाषाविद् प्रो० अलैक्जेण्डर थामसन महोदयानुसारं संस्कृतभाषायाः वर्णमालायाः वर्गीकरणं अतुलनीयमुदाहरणं विद्यते। वाल्टरयूजीनक्लार्कमहोदयानुसारं पाणिनीयव्याकरणं शीघ्रातिशीघ्रं समग्रेऽपि विश्वं वैज्ञानिकव्याकरणरूपेण प्रतिष्ठितं भविष्यति।''[9]
महर्षिणा पाणिनिना 2500 ईशवीयवर्षपूर्वे विरचिता 'अष्टाध्यायी' (शब्दानुशासनम्) विश्वस्य सर्वाभ्यः भाषाभ्यः सर्वेभ्यः वैज्ञानिकेभ्यश्च आदर्श– सर्वोत्कृष्टतायाः च उदाहरणरूपेण द्रष्टुं शक्यते। 'अष्टाध्यायी' ग्रन्थरचनायां या पद्धतिः पाणिनिना आश्रिता तामेव पद्धतिमाश्रित्य वर्तमानसङ्गणकविज्ञान प्रचलति। यदि सङ्गणकेन सह अस्याः भाषायाः प्रयोगः स्यात् तर्हि सङ्गणकजगति निश्चितमेव एका महती क्रान्तिः आगमिष्यति।
सुप्तसिद्धायाः नासा (Nasa) इति संस्थायाः प्रतिष्ठितेन वैज्ञानिकेन मिस्टर रिक ब्रिग्स (Mr. Rick Brigs) महोदयेन 1980 ईशवीयवर्षे स्वशोधपत्रे स्पष्टं कृतं यत् संगणकस्यः सॉफ्टवेयर प्रोग्रामिंग' इत्यस्य कृते संस्कृतभाषा सर्वश्रेष्ठभाषा भवितुं शक्नोति। तदनन्तरं सम्पूर्णविश्वे च भाषाविज्ञानस्य सङ्गणकस्य च अन्तः सम्बन्धानां तस्योपगितायाः सन्दर्भे च विभिन्नशोधकार्याणि अभवन्। 'जुलाई' इति मासे 1987 तमे ईश्वीयवर्षे 'फोर्ब्स' Forbes 12 इति पत्रिकायां इयं सूचना प्रकाशिता यत्– संस्कृतभाषा सङ्गणकस्य सॉफ्टवेयर प्रोग्रामिंग इत्यस्य कृते सर्वश्रेष्ठ भाषाऽस्ति। एतां सूचनां श्रुत्वा संस्कृतविद्वांसः भाषावैज्ञानिकाः सङ्गणकवैज्ञानिकाश्च आश्चर्यचकिताः अभवन्। तदनुसंयुक्तसहयोगेन संस्कृतविद्वांसः सङ्गणकविशेषज्ञाश्च एतस्मिन् क्षेत्रे कार्यमारब्धवन्तः। अधुना जगति विभिन्नदेशेषु संस्कृतभाषायां सङ्गणकस्य 'सॉफ्टवेयर प्रोग्रामिंग' इत्यस्य कार्यं प्रचलितम् अद्यावधिः प्राप्त 'नासा' (Nasa) वैज्ञानिकानां सूचनाऽनुसारेण सम्भावित 2025 ईशवीयवर्षात् 2034 ईशवीयवर्षपर्यन्तं सङ्गणकस्य षष्ठ्याः सप्तम्याश्च स्थितौ सङ्गणकानि निखिले विश्वे संस्कृतभाषायां कार्य करिष्यन्ति। अनया वैश्विकक्रान्तया संस्कृतभाषा स्वयमेव सम्पूर्णधरातले देदीप्यमाना भविष्यति तथा च समग्रस्यापि विश्वस्य भाषा भविष्यति इति विश्वासो वर्तते।[10]
सङ्गणकस्य क्षेत्रे संस्कृतभाषाया अखिलविश्वस्मै अत्यन्ताकर्षकाणि उत्साहवर्धकानि द्वाराणि उदघाटितानि। संस्कृतस्य सङ्गणकस्य च अन्तः सम्बन्धानां संदर्भ भारते एव न अपितु विश्वस्य अमरीका, जर्मनी, जापान इत्यादिकेषु अनेक देशेषु अत्यन्तमहत्वपूर्णां भूमिकां निर्वहन्ति विद्वांसः। सन्दर्भेऽस्मिन् 'इण्डियन इन्सटीट्यूट ऑफ इन्फार्मेशन टेक्नोलॉजी' तथा च 'पूर्ण एडवांस संस्कृत शोध संस्थान' इत्यनयोः भूमिका तु विशेषरूपेण प्रशंसायोग्याऽस्ति। प्राकृतिक भाषासंस्थानस्य (NLP) माध्यमेन 'हैदराबाद' इत्यनेन एका विशिष्टयोजनाऽपि संचालिता। अनेन प्रकारेणैव 'बंगलूरू' परियोजनाऽपि एतस्याः विशिष्टाङ्गत्वेन विज्ञातुं शक्यते। सम्प्रति संस्कृतभाषां सङ्गणकेन सह योजयित्वा विश्वव्यापि कर्तुं संस्कृतविद्विद्भिः सङ्गणक– वैज्ञानिकैः च सङ्गणकभाषाविज्ञानम् (Computational Linguistic) भाषावैज्ञानिकी अभियान्त्रिकी (Language Engineering) इत्यादिषु विषयेषु प्रोत्साहनं करणीयम्। अस्यां दिशि 'साफ्टवेयर इण्डस्ट्रीज' (Software Industries) वाणिज्यिक (Commercial) स्तरे तथा 'आई.आई.टी.' (IIT), 'एन. आई.टी.' (N.I.T.) इत्यादीनाम् अनुसन्धानस्तरे उत्कृष्टतया भूमिकाया भवितव्या। यद्यपि अस्यां दिशि। 1- Translation 2- Voice recognition इति सम्बन्ध्युपलब्धयः (Issuses) विशिष्टरूपेण विचारणीया सन्ति। तथापि समन्वितप्रयासैः एताः कठिनताः सरलतया दूरं भवितुं शक्यन्ते।[11]
संस्कृतस्य गुणवत्ता वेदानां शास्त्राणां संक्षिप्तानि संस्करणानि हिन्दी–भाषानुवादैः सह सम्पादनीयानि। तानि जनेभ्यः अल्पमूल्येन देयानि। बहवः जनाः संस्कृतमजानन्तः अपि विवादप्रसङ्गे कथयन्ति यदिदं वेदेषु लिखितमस्ति, किन्तु ते वेदानामाकारमपि कदापि न दृष्टवन्तः, वेदानां मन्त्राः कीदृशाः सन्ति इति ते न जानन्ति तथापि तेषां हृदि आस्थाकारणात् ते एवं वदन्ति वेदमाहात्म्यविषये मनुनापि उक्तम्–

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।

स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।''[12]

एवं सर्वज्ञानमयत्वात् वेदानामपरिहार्यत्वमङ्गीकृतम्। यस्मिन् देशे वेदस्योद्घोषः श्रूयते स्म तस्मिन् देशे अद्य बहवो जनाः किमपि न जानन्ति। अतः संस्कृतशिक्षागुणवत्तासंवर्धनार्थमस्माभिः संस्कृतज्ञैः गेहं गेहं गत्वा वेदपरिचयः शास्त्रपरिचयः वा कारणीयः। संस्कृते यत्किमपि अमृतस्वरूपं प्राप्यते तस्य प्रचारार्थं प्रयत्नः करणीयः। संस्कृतवाङ्मये अलभ्यमानानि सुवचनानि भित्तिषूटंकनीयानि। संस्कृत नाटकानामभिनयोऽपि स्थाने स्थाने प्रदर्शनीयः।
अस्माभिर्वैदेशिकानामपि साधुचरितमङ्गीकर्तव्यम्। भारतीयाः प्राचीन–कालेऽन्येषामपि चरित्रविषयं पण्डिताः आसन्। ते विदेशीयानां ज्ञानं विज्ञानं दर्शनतत्वं च जानन्ति स्म अस्मिन् विषये मनुना उक्तम्–

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।[13]

अर्थात् विदेशीयाः स्वचरित्रविषये सन्दिहाना यदा भारतीयाचार्यान् प्रत्यागतास्तदा भारतीयास्तेषां चरित्रमुपदिष्टवन्तः। महदाश्चर्यमासीदेतत् इदानीं चरित्रमपि न जानन्ति भारतीयाः, अन्येषां चरित्रस्य का कथा। अस्मिन् युगे विदेशीयाः संस्कृतवाङ्मयं पठन्ति रहस्यं च तस्योद्घाटयन्ति अतः एतत् सर्वं मनसि निधाय संस्कृतशिक्षाभिवृद्धयर्थं सर्वैः कटिबद्धैर्भाव्यम्।
अतीते समये संस्कृतशिक्षा सम्यक् वृद्धिं गता। असंख्याः संस्कृत–शिक्षाश्रमाः आसन् ते आश्रमाः ऋषिभिः आचार्यैः विद्वद्भिः वा संचाल्यमानाः आसन्। ते विद्यादानेन जीविकार्जनतत्पराः न आसन् अपितु स्वार्जितां गुरुमुखाद्वा विद्यां शिष्येभ्यः समर्प्य विद्याया परम्परां शास्वतीं कर्तुकामा महदुद्देश्यवन्त अभूवन्। एष एव ब्रह्मणत्वसिद्धये अपरिहार्यमासीत्। सा परम्परा अद्य लुप्तप्राया संजाता। ऋषीणामाचार्याणां च सम्प्रदायो विघटितप्रायाः ये केचन अङ्गुलिगणनीयाः विद्वांसः अद्यपि तां परम्पराम् उज्जीवयन्ति। सा परम्परा संरक्षिता भवेत् – गुरुकुलानि आश्रमाश्च पुनरूद्घटिताः भवन्तु तदर्थं प्रयासः समाजेन शासनेन च करणीयः।
संस्कृविद्यालयेषु माध्यमिक विद्यालयेषु प्राथमिक विद्यालयेषु विश्व–विद्यालयेषु च संस्कृतस्याध्यापनमधिकाधिक हिन्दीमाध्यमेन भवति। हिन्दीमाध्यमेन शोधप्रबन्धं लेखित्वा जनाः शोधोपाधिं लभन्ते। एतस्मात् कारणात् शिक्षाजगति संस्कृतस्य महती क्षति जायमानास्ति। विविधसंस्कृतसंस्थासु संस्कृतकक्षाषु च संस्कृतस्य वातावरणं दृग्गोचरं न भवति। अतः आवश्यकतास्ति यत् शिक्षणसंस्था संस्कृताध्यापनं संस्कृतमाध्यमेन भवेत् संस्कृतशोधप्रबन्धाः संस्कृतेन एव लिखन्तु जनाः तथा शासनेन नियमः कल्पनीयः। संस्कृतमाध्यमेनाध्यापितुं संस्कृतशिक्षकाणां प्रदेशस्तरे राष्ट्रस्तरे च प्रशिक्षणं भवेत्।''
एतेन संस्कृतशिक्षकाः संस्कृतताध्यापनं संस्कृतमाध्यमेन कर्तुं समर्थाः भवेयुः। तैः संस्कृताध्यापकैः प्रयासो विधेयः यत् छात्राः संस्कृतप्रश्नानामुत्तराणि संस्कृतभाषायाः माध्यमेन ब्रूयुः। बालेषु युवसु वृद्धेषु सर्वेष जनेषु च यथा संस्कृतं प्रति रूचिः समुत्पद्येत् तथा प्रयतनीयम्। तदर्थं पाठ्यपद्धतिः रूचिकरा करणीया।
भारते सहस्राधिकाः माध्यमिकसंस्कृतविद्यालयाः सन्ति येषु 'प्रथमा' कक्षातः 'उत्तरमध्यमा' पर्यन्तमध्ययनमध्यापनं च प्रचलित। एते विद्यालयाः एव अद्यावधि भारतीयसंस्कृतज्ञानपरम्परां रक्षितवन्तः किन्त्वधुना एते विद्यालयाः भौतिक सुविधानामभावकारणेन परम्परागतसंस्कृतशिक्षकचयनप्रक्रियायामवरोधकारणेन च निश्चेतनाः दुर्बलाश्च सञ्जाताः सन्ति। एतेषां विद्यालयानां स्तरोन्नयनार्थं पुनरूज्जीवनार्थं च सर्वैः संस्कृतानुरागिभिः प्रयासों विधेयः।

## संदर्भ


1. बृहदारण्यकोपनिषद् – 1.4.14
2. मनुस्मृतिः – 2–166
3. ऋग्वेदः – 10/57/1
4. यजुर्वेदः – 4/13
5. अथर्ववेदः – 12/1/12
6. अथर्ववेदः – 12/1/63
7. ऋग्वेदः – 1/89/1
8. यजुर्वेद – 30/3
9. भारतस्य विरासतः, पृ० – 339, 340.
10. English Research Magazine] July] 1989 ad
11. MACDOELL-H.S.L.P. - 5-
12. मनुस्मृतिः –1–126
13. मनुस्मृतिः –2–20